श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकपञ्चाशः सर्गः ॥

## श्रीरामस्य बन्धनतो मोक्षं श्रुत्वा चिन्तितेन रावणेन धूम्राक्षस्य युद्धाय प्रेषणं सेनापतिना सह तस्य नगरान्निर्गमनं च

तेषां तु तुमुलं शब्दं वानराणां महौजसाम्।
नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः॥ **6.51.1** ॥

स्निग्धगम्भीरनिर्घोषं श्रुत्वा तं निनदं भृशम्।
सचिवानां ततस्तेषां मध्ये वचनमब्रवीत्॥ **6.51.2** ॥

यथासौ सम्प्रहृष्टानां वानराणामुपस्थितः।
बहूनां सुमहान् नादो मेघानामिव गर्जताम्॥ **6.51.3** ॥

सुव्यक्तं महती प्रीतिरेतेषां नात्र संशयः।
तथाहि विपुलैर्नादैश्चुक्षुभे लवणार्णवः॥ **6.51.4** ॥

तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ।
अयं च सुमहान् नादः शङ्कां जनयतीव मे॥ **6.51.5** ॥

एवं च वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः।
उवाच नैर्ऋतांस्तत्र समीपपरिवर्तिनः॥ **6.51.6** ॥

ज्ञायतां तूर्णमेतेषां सर्वेषां च वनौकसाम्।
शोककाले समुत्पन्ने हर्षकारणमुत्थितम्॥ **6.51.7** ॥

तथोक्तास्ते सुसम्भ्रान्ताः प्राकारमधिरुह्य च।
ददृशुः पालितां सेनां सुग्रीवेण महात्मना॥ **6.51.8** ॥

तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ।
समुत्थितौ महाभागौ विषेदुः सर्वराक्षसाः॥ **6.51.9** ॥

सन्त्रस्तहृदयाः सर्वे प्राकारादवरुह्य ते।
विवर्णा राक्षसा घोरा राक्षसेन्द्रमुपस्थिताः॥ **6.51.10** ॥

तदप्रियं दीनमुखा रावणस्य च राक्षसाः।
कृत्स्नं निवेदयामासुर्यथावद् वाक्यकोविदाः॥ **6.51.11** ॥

यौताविन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ।
निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ॥ **6.51.12** ॥

विमुक्तौ शरबन्धेन दृश्येते तौ रणाजिरे।
पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ॥ **6.51.13** ॥

तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः।
चिन्ताशोकसमाक्रान्तो विवर्णवदनोऽभवत्॥ **6.51.14** ॥

घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः।
अमोघैः सूर्यसङ्काशैः प्रमथ्येन्द्रजिता युधि॥ **6.51.15** ॥

तदस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम।
संशयस्थमिदं सर्वमनुपश्याम्यहं बलम्॥ **6.51.16** ॥

निष्फलाः खलु संवृत्ताः शराः पावकतेजसः।
आदत्तं यैस्तु सङ्ग्रामे रिपूणां जीवितं मम॥ **6.51.17** ॥

एवमुक्त्वा तु सङ्क्रुद्धो निःश्वसन्नुरगो यथा।
अब्रवीद् रक्षसां मध्ये धूम्राक्षं नाम राक्षसम्॥ **6.51.18** ॥

बलेन महता युक्तो रक्षसां भीमविक्रम।
त्वं वधायाशु निर्याहि रामस्य सह वानरैः॥ **6.51.19** ॥

एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता।
परिक्रम्य ततः शीघ्रं निर्जगाम नृपालयात्॥ **6.51.20** ॥

अभिनिष्क्रम्य तद् द्वारं बलाध्यक्षमुवाच ह।
त्वरयस्व बलं शीघ्रं किं चिरेण युयुत्सतः॥ **6.51.21** ॥

धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः।
बलमुद्योजयामास रावणस्याज्ञया भृशम्॥ **6.51.22** ॥

ते बद्धघण्टा बलिनो घोररूपा निशाचराः।
विनद्यमानाः संहृष्टा धूम्राक्षं पर्यवारयन्॥ **6.51.23** ॥

विविधायुधहस्ताश्च शूलमुद्गरपाणयः।
गदाभिः पट्टिशैर्दण्डैरायसैर्मुसलैरपि॥ **6.51.24** ॥

परिघैर्भिन्दिपालैश्च भल्लैः पाशैः परश्वधैः।
निर्ययू राक्षसा घोरा नर्दन्तो जलदा यथा॥ **6.51.25** ॥

रथैः कवचिनस्त्वन्ये ध्वजैश्च समलङ्कृतैः।
सुवर्णजालविहितैः खरैश्च विविधाननैः॥ **6.51.26** ॥

हयैः परमशीघ्रैश्च गजैश्चैव मदोत्कटैः।
निर्ययुर्नैर्ऋतव्याघ्रा व्याघ्रा इव दुरासदाः॥ **6.51.27** ॥

वृकसिंहमुखैर्युक्तं खरैः कनकभूषितैः।
आरुरोह रथं दिव्यं धूम्राक्षः खरनिःस्वनः॥ **6.51.28** ॥

स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः।
हसन् वै पश्चिमद्वाराद्धनूमान् यत्र तिष्ठति॥ **6.51.29** ॥

रथप्रवरमास्थाय खरयुक्तं खरस्वनम्।
प्रयान्तं तु महाघोरं राक्षसं भीमदर्शनम्॥ **6.51.30** ॥

अन्तरिक्षगताः क्रूराः शकुनाः प्रत्यषेधयन्।
रथशीर्षे महाभीमो गृध्रश्च निपपात ह॥ **6.51.31** ॥

ध्वजाग्रे ग्रथिताश्चैव निपेतुः कुणपाशनाः।
रुधिरार्द्रो महाऽश्वेतः कबन्धः पतितो भुवि॥ **6.51.32** ॥

विस्वरं चोत्सृजन्नादान् धूम्राक्षस्य निपातितः।
ववर्ष रुधिरं देवः सञ्चचाल च मेदिनी॥ **6.51.33** ॥

प्रतिलोमं ववौ वायुर्निर्घातसमनिःस्वनः।
तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे॥ **6.51.34** ॥

स तूत्पातांस्ततो दृष्ट्वा राक्षसानां भयावहान्।
प्रादुर्भूतान् सुघोरांश्च धूम्राक्षो व्यथितोऽभवत्।
मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरःसराः॥ **6.51.35** ॥

ततः सुभीमो बहुभिर्निशाचरै -
वृतोऽभिनिष्क्रम्य रणोत्सुको बली।
ददर्श तां राघवबाहुपालितां
महौघकल्पां बहु वानरीं चमूम्॥ **6.51.36** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकपञ्चाशः सर्गः॥